# तर्कसंग्रहदिशा सप्तपदार्थाः

कौशिक-पात्रः
सहकारी अध्यापकः
संस्कृत-विभागस्य
शालतोड़ा नेताजी सेन्टिनारी कलेज इति महाविद्यालयस्य
शालतोड़ा, बॉकुड़ा, पश्चिमबङ्ग
इ-मेल- patrakousikjrf@gmail.com

# मङ्गलाचरणम्

"निधाय हृदि विश्वेशं विधाय गुरुवन्दनम्।
बालानां सुखबोधाय क्रियते तर्कसंग्रहः॥"

अन्वयः - विश्वेषं हृदि निधाय, गुरुवन्दनं विधाय च बालानां  सुखबोधाय तर्कसंग्रहः क्रियते।

# पदार्थः

'पदस्य अर्थः पदार्थः' इति व्युत्पत्या अभिधेयत्वं पदार्थसामान्यलक्षणम्। अर्थबोधाय यत् शक्तं तदेव पदम्। गत्यर्थके ज्ञानार्थके वा ऋ-धातो थ-प्रत्ययेण अर्थ-शब्दस्य व्युत्पत्तिः।

ऋच्छन्ति इन्द्रियाणि यं स अर्थः, इन्द्रियानुभवयोग्यः, ज्ञेयः, अभिधेयो वा। तस्मात् पदार्थ इत्यनेन पदसम्बन्ध्यभिधाविषयत्वस्य लाभे अपि पदसम्बन्धित्वांशस्य अव्यावर्तकत्वात् अभिधेयत्वमात्रं पदार्थलक्षणम्। यस्य कस्यापि पुरुषस्य ईश्वरस्य वा यो ज्ञानविषयो भवितु-मर्हति स पदार्थ इत्यर्थः ।

# पदार्थस्य भेदाः

- नव्यन्यायमते सप्त पदार्थाः।
- तथा च उक्तं तर्कसंग्रहे - 'द्रव्यगुणकर्म-सामान्यविशेषसमवायाभावाः सप्तपदार्थाः' इति।
- भाषापरिच्छेदे च- 'द्रव्यं गुणस्तथाकर्म सामान्यं सविशेषषम्। समवायस्तथाऽभावः पदार्थाः सप्त कीर्तिताः' इति'।
- अर्थात् पदार्थः सप्तविधः, यथा- द्रव्यम्, गुणः, कर्म, सामान्यम्, विशेषः, समवायः, अभावः चेति।

# सप्तपदार्थाः



# सप्त पदार्थाः

- **१) द्रव्यम्**- गुणवत्त्वं द्रव्यत्वं। 'द्रव्यत्वजातिमत्त्वं वा द्रव्यत्वम्। द्रव्याणि पृथिव्यादीनि नव।
- **२) गुणः-** गुणत्वजातिमान् गुणः। रूपरसादयः चतुर्विंशतिः गुणाः।
- **३) कर्म-** संयोगभिन्नत्वे सति संयोगासमवायिकारणत्वं कर्मत्वम्। उत्क्षेपणादीनि पञ्च फर्माणि।
- **४) सामान्यम्-** नित्यत्वे सति अनेक समवेतत्वं सामान्यत्वम्।गोत्वपशुत्वादिकं सामान्यम्। अन्त्यो नित्यद्रव्यवृत्तिविशेषः परिकीर्तितः। सामान्यं द्विविधं- परम्, अपरं चेति।

- **५) विशेषः** - परमाण्वादिषु नित्यद्रव्येषु वर्त्तमाना इतरभेदानुमितिहेतवो विशेषाः। विशेषास्तु अनन्ता एव
- **६) समवायः**- नित्यसम्बन्धः समवायः। अयुतसिद्धयोः अपृथक् सिद्धयो र्वा सम्बन्धः समवायः। गुणगुणिनोर्यथा। समवायस्तु एक एव।
- **७) अभावः**- भावभिन्नत्वम् अभावत्वम्। निषेधाभिलापकप्रत्ययगम्यत्वम् अभावत्वम् इति वा। अभावश्चतुर्विधः - प्रागभावः, प्रध्वंसाभावः, अत्यन्ताभावः, अन्योन्याभावः चेति।

# द्रव्याणि

- '**तत्र द्रव्याणि पृथिव्यप्तेजोवाय्वाकाशाकालदिगात्ममनांसि नवैव॥' २॥**
- अर्थात् पृथिवी, आपः, तेजः, वायुः, आकाशः, कालः, दिक्, आत्मा, मनः चेति नव द्रव्याणि।

# 1 सप्तपदार्थाः – द्रव्याणि



पृथ्वी



आकाशः



तेजः



वायुः



आत्मा



जलम्



कालः





दिक्



मनः

# गुणः

- रूपरसगन्धस्पर्शसंख्यापरिमाणपृथक्त्वसंयोगविभग-परत्वापरत्वगुरुत्व- द्रवत्व-स्नेह-शब्द-बुद्धि-सुख-दुःखेच्छा-द्वेष-प्रयत्न- धर्माधर्म-संस्कारारः चतुर्विंशतिर्गुणाः ॥ ३॥
- अर्थात् रूपं, रसः, गन्धः, स्पर्शः, संख्या, परिमाणं, पृथक्त्वं, संयोगः, विभगः, परत्वम्, अपरत्वं, गुरुत्वं, द्रवत्वं, स्नेहः, शब्दः, बुद्धिः, सुखं, दुःखम्, इच्छा, द्वेषः, प्रयत्नः, धर्मः, अधर्मः, संस्कारः चेति चतुर्विंशतिः गुणाः।

2

# सप्तपदार्थाः – गुणाः

रूपम्



रसः



गन्धः



स्पर्श



संख्या



परिमाणम्



पृथक्त्वम्



संयोगः



# गुणाः

विभागः



परत्वम्



अपरत्वम्



गुरुत्वम्



द्रवत्वम्



स्नेहः



शब्दः



बुद्धिः



# गुणाः

सुखम्



दु:खम्



इच्छा



द्वेष:



प्रयत्न:



धर्म:



अधर्म:



संस्कार:



# कर्म

- उत्क्षेपणापक्षेपणाकुञ्चनप्रसारणगमनानि पञ्च कर्माणि ॥ ४॥
- उत्क्षेपणम्- ऊर्ध्वदेशसंयोगहेतुरुत्क्षेपणम्।
- अपक्षेपणम्- अधोदेशसंयोगहेतुरवक्षेपणम्।
- आकुञ्चनम्- शरीरसन्निकृष्टसंयोगहेतुराकुञ्चनम्।
- प्रसारणम्- शरीरविप्रकृष्टसंयोगहेतुः प्रसारणम्।
- गमनम्- अन्यत् सर्वं गमनम्।

# सामान्यम्

समानानां भावः सामान्यम् (जातिः)

परमपरं चेति द्विविधं सामान्यम् ॥ ५॥

- परम्
- परमधिकदेशवृत्तिः।
- उदाहरणम्- सत्ता।
- द्रवे, गुणे, कर्मणि च तिष्ठति।

- अपरम्
- अपरं न्यूनदेशवृत्तिः।
- उदाहरणम्- द्रव्यत्वम्।
- केवलं द्रव्ये तिष्ठति।

# विशेषः

- नित्यद्रव्यवृत्तयो विशेषास्त्वनन्ता एव ॥ ६॥
- अर्थात् नित्यद्रव्येषु वर्तते।
- व्यावर्तकः (भेदकधर्मः)
- अनन्तः।

- नित्यद्रव्याणि
- पृथिव्यादिचतुष्टयस्य परमाणवः आकाशादिपञ्चकं च नित्यद्रव्याणि।
- अर्थात् पृथिवी-अप्-तपृथिवी-अप्-तेजो-वायूनां परमाणवः, आकाश-काल-दिक्-आत्मा-मनांसि नित्यद्रव्याणि।
- नित्यत्वम्- उत्पत्तिशून्यत्वे सति नाशशून्यत्वम्।

# समवायः

- समवायस्त्वेक एव ॥ ७॥
- एकः।
- नित्यसम्बन्धः।
- अयुतसिद्धयोः सम्बन्धः।

- अयुतसिद्धौ
- अवयवावयविनौ
- गुण-गुणिनौ
- क्रिया-क्रियावन्तौ
- जाति-व्यक्ती
- विशेष-नित्यद्रव्ये
- एतेषां परस्परनित्यसम्बन्नपरस्परनित्यसम्बन्धः समवायः।

# अभावः

- अभावश्चतुर्विधः प्रागभावः प्रध्वंसाभावः अत्यन्ताभावः अन्योन्याभावश्चेति ॥ ८॥
- प्रागभावः - अनादिः सान्तः प्रागभावः उत्पत्तेः कार्यस्य।

उदाहरणम्- अत्र घटो भविष्यति।

- प्रध्वंसाभावः - सादिरनन्तः प्रध्वंसः उत्पत्त्यनन्तरं कार्यस्य।

उदाहरणम्- दण्डेन घटो ध्वस्तः।

अत्यन्ताभावः - त्रैकालिकसंसर्गावच्छिन्नप्रतियोगिताकः अत्यन्ताभावः।

उदाहरणम्- वायौ रूपाभावः।

अन्योन्याभावः - तादात्म्यसम्बन्धावच्छिन्नप्रतियोगिताकः अन्योन्याभावः।

उदाहरणम्- घटो न पटः।

# सप्तपदार्थाः



9
द्रव्याणि
पृथिवी
आपः
तेजः
वायुः
आकाशः
कालः
दिक्
आत्मा
मनः
5
कर्माणि
उत्क्षेपणम्
अपक्षेपणम्
आकुंचनम्
प्रसारणम्
गमनम्
2
सामान्यौ
परम्
अपरम्
4
अभावाः
प्राग भावः
प्रध्वंसा भावः
अत्यन्ता भावः
अन्योन्या भावः
1
समवायः
समवायः
24
गुणाः
रूपः
द्रवत्वम्
रसः
स्नेहः
गंधः
शब्दः
स्पर्श
बुद्धिः
संख्या
सुखम्
परिमाणम्
दुःखम्
पृथक्त्वम्
इच्छा
संयोगः
द्वेषः
विभागः
प्रयत्नः
परत्वम्
धर्मः
अपरत्वम्
अधर्मः
गुरुत्वम्
संस्करः
∞
विशेषाः
∞

# धन्यवादः

